PANCHTATVI
PT.MADHAV RAO
KESHAV RAMAMAMYA

श्रीः

॥ पञ्चस्तवी ॥

कतिपयसरलपदान्तरालङ्कृता

संस्कर्तृप्रणीतराज्ञीशारिकाज्वालास्तोत्रचतुष्टयान्विता

कक्षेत्युपाह्वपण्डितनाथरामशास्त्रिसंस्कृता ॥

पण्डितमाधवराम केशवरामाभ्यां

स्वीये

काश्मीरमार्कण्टायल प्रेस नाम्नि मुद्रणालये

मुद्रयित्वा प्रकाशिता ।

संवत् १९६५

दीपमालाङ्कः

ॐ

पञ्चस्तवी ।

लघुस्तवः प्रथमः ।

ॐ नमस्त्रिपुरसुन्दर्यै ।

[1]ऐन्द्र[2]स्येव शरासनस्य दधती मध्ये[3]ललाटं प्रभां ।
शौ[4]क्लीं कान्तिमनु[5]ष्णगोरिव शिरस्यातन्वती सर्वतः ॥
एषासौ त्रि[6]पुरा हृदि द्युतिरिवोष्णांशोः सदाहःस्थिता ।
छिन्द्यान्नः सहसा प[7]दैस्त्रिभिरघं [8]ज्योतिर्मयी वाङ्मयी ॥ १ ॥

---

१ मंत्रोद्धारादिविधिरत्र दैशिकमुखादेवावगंतव्य :। २ इन्द्रसम्बन्धिनः। ३ अव्ययीभावः ४ शुक्लरूपाम्। ५ सोमस्य। ६ त्रिषु ललाटादिविशेषपुरेषु वर्तमाना चिद्दीप्तिः। ७ ललाटादिभिः स्थानैर्वर्णरूपैश्च। ८ परप्रकाशस्वरूपा।

या मात्रा [1]त्रपुसीलतातनुलसत्तन्तूत्थितिस्पर्धिनी ।
वाग्बीजे प्रथमे स्थिता तव सदा तां मन्महे ते वयम् ॥
शक्तिः कुण्डलिनीति विश्वजननव्यापारबद्धोद्यमा ।
ज्ञात्वेत्थं न पुनः [2]स्पृशन्ति जननीगर्भेऽर्भकत्वं नराः ॥ २ ॥
दृष्ट्वा [3]संभ्रमकारि वस्तु सहसा ऐ ऐ इति व्याहृतं ।
येना[4]कूतवशादपीह वरदे बिन्दुं विनाप्यक्षरम् ॥
तस्यापि ध्रुवमेव देवि तरसा जाते तवानुग्रहे ।
वाचः सूक्तिसुधारस[5]द्रवमुचो निर्यान्ति वक्त्राम्बुजात् ॥ ३ ॥
यन्नित्ये ! तव कामराजमपरं मन्त्राक्षरं [6]निष्कलं ।

---

१ कर्कटलतायाः सूक्ष्माः प्रसरन्तश्च ये तंतवस्तेषां प्रथमारम्भमनुकरोतीति तथोक्ता ।
२ पुनर्नावर्तन्त इत्यर्थः । ३ त्रासविधायि सर्पादिकम् । ४ भयाद्यभिप्रायात् । ५ सारोद्धारः
अमृतमाधुर्यमिवोद्गिरन्त्य इत्यर्थः । ६ कलातीतम् ।

तत्सार[1]स्वतमित्यवैति विरलः कश्चिद्बुधश्चेद्भुवि ॥
आ[2]ख्यानं प्रतिप[3]र्व सत्य[4]तपसो यत्कीर्तयन्तो द्विजाः ।
प्रारम्भे प्रणवास्प[5]दप्रणयितां नीत्वोच्चरन्ति स्फुटम् ॥ ४ ॥
यत्सद्यो वचसां प्रवृत्तिकरणे दृष्टप्रभावं बुधैः ।
स्ता[6]र्तीयीकमहं नमामि मनसा त्वद्बीजमिन्दुप्रभम् ॥
अस्त्वौर्वोऽपि सर[7]स्वतीमनुगतो जाड्याम्बुविच्छित्तये ।
गोशब्दो गि[8]रि वर्तते स नियतं योगं विना सिद्धिदः ॥ ५ ॥
एकैकं तव देवि बीजमनघं सव्यञ्जनाव्यञ्जनं ।
[9]कूटस्थं यदि वा पृथक्क्रमगतं यद्वा स्थितं व्युत्[10]क्रमात् ॥

---

१ सरस्वतीदेवताकम् । २ या पश्यति न सा ब्रूते या ब्रूते सा न पश्यति । अहो व्याध स्वकार्यार्थी कं पृच्छसि मुहुर्मुहुरिति पद्यान्तर्गतमितिहासम् । ३ पूर्णिमादौ । ४ एतदाख्यस्य महर्षेः । ५ ओंकारस्थानसम्बन्धितां नीत्वा । ६ तृतीयम् । ७ एतदाख्यां नदीं च । ८ वाण्याम् ९ अनेकाक्षरसंयुक्तम् । १० विपरीतक्रमात् ।

यं यं काममपेक्ष्य येन विधिना केनापि वा चिन्तितं ।
जप्तं वा सफलीकरोति सहसा तं तं समस्तं नृणाम् ॥ ६ ॥

वामे पुस्तकधारिणीमभयदां[1] साक्षस्रजं[2] दक्षिणे ।
भक्तेभ्यो वरदा[3]नपेशलकरां[4] कर्पूरकुन्दोज्ज्वलाम्[5] ॥
उज्जृम्भा[6]म्बुजपत्रकान्तनयनस्निग्धप्रभालोकिनीं ।
ये त्वामम्ब ! न शीलयन्ति[7] मनसा तेषां कवित्वं कुतः ॥ ७ ॥

ये त्वां पाण्डुर[8]पुण्डरीकपटलस्पष्टाभिरामप्रभां ।
सिञ्चन्तीममृत[9]द्रवैरिव शिरो ध्यायन्ति मूर्ध्नि स्थिताम् ॥
अश्रान्तं[10] विकट[11]स्फुटाक्षरपदा निर्याति वक्त्राम्बुजा- ।

---

१ द्वितीयवामकरे । २ जपमालाधारिणीम् । ३ द्वितीयदक्षिणकरे । ४ लालितहस्ताम् । ५ धवलाम् । ६ विकसितपद्मपत्रवत् शुक्लवर्णे ये नेत्रे तयोर्या विशेषरम्या स्नेहयुक्ता च प्रभा तयालोकते तच्छीलेति तथोक्ताम् । ७ आराधयन्ति । ८ सितवर्णामित्यर्थः । ९ रसैः । १० निरन्तरम् । ११ उदाराणि च प्रकटार्थानि अक्षराणि येष्वेवंभूतानि पदानि यस्याः ।

तेषां भारति! भारती सु[1]रसरित्कल्लोलखेलोर्मिवत् ॥ ८ ॥

ये सिन्दूरप[2]रागपुञ्जपिहितां[3] त्वत्तेजसा द्यामिमा- ।
मुर्वीं चापि विलीन[4]यावकरसप्रस्तारमग्नामिव ॥
पश्यन्ति क्षणमप्यनन्य[5]मनसस्तेषामनङ्ग[6]ज्वर- ।
क्लान्तास्त्रस्तकुरङ्गशावकदृशो[7] वश्या भवन्ति स्फुटम् ॥ ९ ॥

[8]चञ्चत्काञ्चनकुण्डलाङ्गदधरामाबद्धकाञ्चीस्रजं ।
ये त्वां चेतसि तद्गते क्षणमपि ध्यायन्ति कृत्वा स्थितिम् ॥
तेषां वेश्मसु विभ्रमादहरहः[9] स्फारीभवन्त्यश्चिरं ।
माद्यत्कु[10]ञ्जरकर्णतालतरलाः स्थैर्यं भजन्ते श्रियः ॥ १० ॥

---

१ अखिन्नप्रसरत्वादित्यर्थः । २ धूलिः । ३ व्याप्ताम् । ४ गलदलक्तकद्रवबिन्दुदंतुरामिव । ५ एकाग्रचित्ताः । ६ कन्दर्पार्तिपीडिताः । ७ मृगाद्यः स्त्रियः । ८ देदीप्यमानम् । ९ उत्तरोत्तरं वर्धमानाः । १० अनवस्थायिन्योऽपि चिरावस्थितिं तत्र लभन्त इत्यर्थः ।

आ[1]र्भट्या शशिखण्डमण्डितजटाजूटां नृमुण्[2]डस्रजं ।
बन्[3]धूकप्रसवारुणाम्बरधरां प्रेतासनाध्यासिनीम् ॥
त्वां ध्यायन्ति चतुर्भुजां त्रिनयनामापीनतुङ्गस्तनीं ।
मध्ये निम्नवलित्रयांकिततनुं त्वद्रूपसंवित्तये ॥ ११ ॥
जातोऽप्यल्पप[4]रिच्छदे क्षितिभुजां सा[5]मान्यमात्रे कुले ।
निःशेषावनिचक्रवर्तिपदवीं लब्ध्वा प्रतापोन्नतः ॥
यद्विद्याधरवृन्दवन्दितपदः श्रीवत्सराजोऽभव- ।
देवि ! त्वच्चरणाम्बुजप्रणतिजः सोयं प्रसादोदयः ॥ १२ ॥
चण्डि त्वच्चरणाम्बुजार्चनविधौ बि[6]ल्वीदलोल्लुण्ठन- ।

---

१ या तु प्रौढार्थसंदर्भवृत्तिरारभटी तु सेति लक्षितया वीररसाश्रययोद्धतया वृत्त्या।
२ कपालमालाधारिणीम् । ३ जपापुष्पम् । ४ अल्पपरिवारे । ५ अनुत्कृष्टे । ६ बिल्व-पत्रत्रोटनलग्नकण्टकाग्रैः ।

त्रुट्यत्कण्टककोटिभिः परि[1]चयं येषां न जग्मुः कराः ॥
ते दण्डांकुशचक्रचापकुलिशश्रीवत्समत्स्यांकितै- ।
र्जायन्ते पृथिवीभुजः कथमिवाम्भोजप्रभैः पाणिभिः ॥१३॥
विप्राः क्षोणि[2]भुजो विशस्तदि[3]तरे क्षीराज्यमध्वासवै- ।
स्त्वां देवि ! त्रिपुरे ! परापरमयीं सन्तर्प्य पूजाविधौ ॥
यां यां प्रार्थयते म[4]नः स्थि[5]रधियां तेषां त[6] एव ध्रुवं ।
तां तां सिद्धिमवाप्नुवन्ति तरसा विघ्नैरविघ्नीकृताः ॥ १४ ॥
शब्दानां जननी त्वमत्र भुवने वाग्वादिनीत्युच्यसे ।
त्वत्तः केशववासवप्रभृतयोऽप्याविर्भवन्ति स्फुटम् ॥
लीयन्ते खलु यत्र कल्[7]पविरमे ब्रह्मादयस्तेऽप्यमी ।

१ संपर्कम् । २ क्षत्रियाः । ३ शूद्राः । ४ कर्तृपदमेतत् । ५ त्वदेकाग्रवताम् । ६ ब्राह्मणादयः
७ कल्पान्ते ।

सा त्वं काचिदचिन्त्यरूपमहिमा शक्तिः परा गीयसे ॥१५॥

देवानां त्रितयं त्रयी[1] हुतभुजां शक्तित्रयं[2] त्रिस्वरा-[3] ।
त्रैलोक्यं त्रिपदी[4] त्रिपुष्करमथो[5] त्रिब्रह्म[6] वर्णास्त्रयः[7] ॥
यत्किञ्चिज्जगति त्रिधा नियमितं वस्तु त्रिवर्गात्मकं[8] ।
तत्सर्वं त्रिपुरेति[9] नाम भगवत्यन्वेति ते तत्त्वतः ॥ १६ ॥

लक्ष्मीं राजकुले जयां रणभुवि क्षेमंकरीमध्वनि ।
क्रव्यादद्विपसर्पभाजि शबरीं कान्तारदुर्गे[10] गिरौ ॥
भूतप्रेतपिशाचजम्बुकभये स्मृत्वा महाभैरवीं ।
व्यामोहे[11] त्रिपुरां तरन्ति विपदस्तारां च तोयप्लवे[12] ॥ १७ ॥

१ दक्षिणाग्निगार्हपत्याहवनीयरूपा। २ इच्छादि ब्राह्म्यादि वा। ३ उदात्तादयः। ४ गायत्र्याः पदत्रयम्। हृदादि वा। ५ गंगायमुनासरस्वतीति जलत्रयी। ६ वेदत्रयी। ७ अकारोकारमकाररूपाः। ८ धर्मार्थकामात्मकम्। ९ जाग्रदाद्यवस्थात्रयव्याप्तिमती चिद्रूपा शक्तिः। १० दुर्गमं वर्त्म। ११ चित्तभ्रमे। १२ समुद्रादितरणे।

माया कुण्डलिनी क्रिया मधुमती काली कला[1] मालिनी ।
मातङ्गी विजया जया भगवती[2] देवी शिवा शाम्भवी ॥
शक्तिः शङ्करवल्लभा त्रिनयना वाग्वादिनी भैरवी[3] ।
ह्रींकारी त्रिपुरा परापरमयी[4] माता[5] कुमारीत्यसि[6] ॥ १८ ॥
आईपल्लवितैः[7] परस्परयुतैर्द्वित्रिक्रमाद्यक्षरैः ।
काद्यैः क्षान्तगतैः स्वरादिभिरथ क्षान्तैश्च तैः सस्वरैः ।
नमानि त्रिपुरे ! भवन्ति खलु यान्यत्यन्तगुह्यानि[8] ते ।
तेभ्यो भैरवपत्नि ! विंशतिसहस्रेभ्यः परेभ्यो नमः ॥ १९ ॥
बोद्धव्या निपुणं बुधैः स्तुतिरियं कृत्वा मनस्तद्गतं ।

---

१ किंचित्कर्तृत्वरूपिणी । २ ऐश्वर्यादिषट्कवती । ३ भरणाद्रवणाद्वमनाद्वा । ४ सूक्ष्मस्थूलमयी । ५ उत्पत्तिकारिणी । ६ भेदभूमिमारिका । ७ सम्पुटितैः । ८ मन्दधियामगम्यानि ॥

भारत्या त्रिपुरेत्यनन्यमनसा[1] यत्राद्यवृत्ते[2] स्फुटम् ॥
एकद्वित्रिपदक्रमेण कथितस्त्वत्पादसंख्याक्षरै- ।
र्मन्त्रोद्धारविधिर्विशेषसहितः[3] सत्संप्रदायान्वितः[4] ॥ २० ॥

सावद्यं[5] निरवद्यमस्तु यदि वा किंवानया चिन्तया ।
नूनं स्तोत्रमिदं पठिष्यति नरो यस्यास्ति भक्तिस्त्वयि ।
संचिन्त्यापि लघुत्वमात्मनि दृढं संजायमानं हठा- ।
त्वद्भक्त्या मुखरीकृतेन[6] रचितं यस्मान्मयापि ध्रुवम् ॥ २१ ॥

इति श्रीपञ्चस्तव्यां लघुस्तवः ।

---

१ तद्गतमनसाः । २ प्रथमे श्लोके । ३ सव्यंजनत्वादिविशेषसहितः । ४ अविच्छिन्नाचार्योपदेशेनानुगतः । ५ सदोषम् । ६ उत्साहितेन ॥

चर्चास्तवो द्वितीयः

ॐनमस्त्रिपुरसुन्दर्यै ।

ॐ आनन्दसुन्दरपुरन्दरमुक्तमाल्यं ।
मौलौ हठेन [1]निहितं महिषासुरस्य ॥
पादाम्बुजं भवतु मे विजयाय [2]मञ्जु ।
[3]मञ्जीरशिञ्जितमनोहरमम्बिकायाः ॥ १ ॥
सौन्दर्य[4]विभ्रमभुवो भुवनाधिपत्य- ।
सम्पत्तिकल्पतरवस्त्रिपुरे जयन्ति ॥
एते कवित्वकुमुद[5]प्रकरावबोध[6]- ।

---

१ स्थापितम् । २ सुन्दरम् । ३ नूपुरशब्दमनोहरम् । ४ विलासोत्पत्तिहेतवः । ५ षण्डं समूह इत्यर्थः । ६ विकासः ॥

पूर्णेन्द्वस्त्वयि जगज्जननि प्रणामाः ॥ २ ॥

देवि ! स्तुतिर्व्यतिकरे[1] कृतबुद्धयस्ते[2] ।
वाचस्पतिप्रभृतयोऽपि जडीभवन्ति[3] ॥
तस्मान्निसर्गजडिमा कतमोऽहमत्र ।
स्तोत्रं तव त्रिपुरतापनपत्नि कर्तुम् ॥ ३ ॥

मातस्तथापि भवतीं भवतीव्रताप- ।
विच्छित्तये[4] स्तुतिमहार्णवकर्णधारः[5] ॥
स्तोतुं भवानि ! स भवच्चरणारविन्द-
भक्तिग्रहः[6] किमपि मां मुखरीकरोति[7] ॥ ४ ॥

---

१ संपर्के । २ बुद्धिकौशलयुक्ताः । ३ त्वन्महिम्नोऽगणनीयत्वात् । ४ नाशाय । ५ तारकः । ६ निरतिशयानुरागः । ७ अबद्धमुखं करोति ॥

सूते[1] जगन्ति भवती[2] भवती[3] बिभर्ति[4] ।
जागर्ति[5] तत्क्षयकृते भवती[6] भवानि ! ॥
मोहं[7] भिनत्ति भवती[8] भवती[9] रुणद्धि[10] ।
लीलायितं[11] जयति चित्रमिदं भवत्याः ॥ ५ ॥

यस्मिन्मनागपि नवाम्बुजपत्रगौरि ! ।
गौरि ! प्रसादमधुरां दृशमादधासि ॥
तस्मिन्निरन्तर[12]मनङ्गशरप्रकीर्णाः ।
सीमन्तिनीनयनसंततयः पतन्ति ॥ ६ ॥

---

१ सृजति । २ ब्राह्मीरूपा । ३ वैष्णवीरूपा । ४ पुष्णाति । ५ सततोद्युक्ता भवति । ६ रौद्रीरूपा । ७ अख्यातिम् । ८ ईश्वररूपा । ९ सदाशिवरूपा । १० स्वरूपं पिधत्ते । ११ लीलैवैषेत्यर्थः । १२ संमोहनादिभिर्विक्षिप्तीकृता याः स्त्रियस्तासां दृष्टयः ॥

पृथ्वीभुजोऽप्युदयनप्रवरस्य तस्य ।
विद्याधरप्रणतिचुम्बितपादपीठः ॥
यच्चक्रवर्तिपदवीप्रणयः[1] स एष ।
त्वत्पादपङ्कजरजःकणजः प्रसादः ॥ ७ ॥

त्वत्पादपङ्कजरजःप्रणिपातपूतैः ।
पुण्यैरनल्पमतिभिः कृतिभिः कवीन्द्रैः ॥
क्षीरैच्छपाकरदुकूलहिमावदाता[2] ।
कैरप्यवापि[3] भुवनत्रितयेऽपि कीर्तिः ॥ ८ ॥

कल्पद्रुमप्रसवकल्पितचित्रपूजा- ।
मुद्दीपितप्रियतमामदरक्तगीतिम् ॥

१ चक्रवर्तित्वप्राप्तिः । २ शुक्लवर्णा । ३ अनिर्वचनीयमाहिमशालिभिः । ४ प्राप्ता । ५ उद्दीपिता द्योतिताऽतिप्रिया मदेन रक्ता च गीतिर्यस्यास्तां तथोक्ताम् ॥

नित्यं भवानि ! भवतीमुप[1]वीणयन्ति ।

विद्याधराः कन[2]कशैलगुहागृहेषु ॥ ९ ॥

लक्ष्मीवशीकरणकर्मणि कामिनीना-

मा[3]कर्षणव्यतिकरेषु च सिद्धमन्त्रः ॥

नीर[4]न्ध्रमोहतिमिरच्छिदुरप्रदीपो ।

देवि ! त्वदंघ्रिजनितो जयति प्रसादः ॥ १० ॥

देवि ! त्वदंघ्रिनखरत्नभुवो मयूखाः ।

प्र[5]त्यग्रमौक्तिकरुचो मु[6]दमुद्वहन्ति ॥

से[7]वानतिव्यतिकरे सुरसुन्दरीणां ।

---

१ वीणयोपगायन्ति । २ सुमेरुः । ३ वशीकरणसंयोगेषु । ४ गाढमोहान्धकारनाशकः ।
५ नूतनम् । ६ आनन्दम् । ७ सेवायां प्रणामकरणे ॥

सीमन्तसीम्नि[१] कुसुमस्तवकायितं[२] यैः ॥ ११ ॥
मूर्ध्नि स्फुरत्[३]तुहिनदीधितिदीप्तिदीप्तं ।
मध्येललाट[४]ममरायुधरश्मिचित्रम्[५] ॥
हृच्चक्र[६]चुम्बि हुतभुक्[७]कणिकानुरूपं ।
ज्योतिर्यदेतदिदमम्ब ! तव स्वरूपम् ॥ १२ ॥
सिन्दूरपांसुपटलच्छुरिता[८]मिव द्यां ।
त्वत्तेजसा जतुरसस्नपितामिवोर्वीम् ॥
यः पश्यति क्षणमपि त्रिपुरे विहाय ।
व्रीडां[९] मृडानि ! सुहृदस्तमनुद्रवन्ति ॥ १३ ॥
मातर्मुहूर्तमपि यः स्मरति स्वरूपं ।

---

१ केशरचनामर्यादायाम् । २ पुष्पस्तबकवदाचरितम् । ३ चन्द्रवर्णम् । ४ अव्ययीभावः । ५ नानावर्णम् । ६ हृदयस्थितम् । ७ अग्निवर्णम् । ८ रञ्जिताम् । ९ लज्जाम् ॥

लाक्षारसप्रसरतन्तुनिभं भवत्याः ॥
ध्यायन्त्यनन्यमनसस्तमनङ्गतप्ताः ।
प्रद्युम्नसीम्नि सुभगत्वगुणं[1] तरुण्यः ॥ १४ ॥
आधारमारुतनिरोधवशेन[2] येषां ।
सिन्दूररञ्जितसरोजगुणानुकारि[3] ॥
तीव्रं हृदि स्फुरति देवि ! वपुस्त्वदीयं ।
ध्यायन्ति तानिह समीहितसिद्धसाध्याः[4] ॥ १५ ॥
ये चिन्तयन्त्यरुणमण्डलमध्यवर्ति ।
रूपं तवाम्ब ! नवयावकपंकपिंगम्[5] ॥

---

१ सौभाग्ययुक्तम् । २ मूलाधारप्राणशक्तिनिरोधतः । ३ पद्मतंतुसदृशम् । ४ सिद्धाभिलाषिताः साध्याख्या देवाः । ५ लाक्षारसः ॥

तेषां सदैव कुसुमायुधबाणभिन्न- ।
वक्षःस्थला मृगदृशो वशगा भवन्ति ॥ १६ ॥
रूपं तव स्फुरितचंद्रमरीचिगौर- ।
मालोकते मनसि वागधिदैवतं यः ॥
निस्सीमसूक्तिरचनामृतनिर्भरस्य[1] ।
तस्य प्रसादमधुराः[2] प्रसरन्ति वाचः ॥ १७ ॥
शर्वाणि ! सर्वजनवन्दितपादपद्मे ! ।
पद्मच्छदच्छविविडम्बितनेत्रलक्ष्मि[3] ॥
निष्पापमूर्तिजनमानसराजहंसि[4] ! ।

---

१ निरवधि यत् शोभनोक्तिरचनारूपममृतं तस्य निर्भरः प्रवाहः प्रसरो अखिन्नत्वाद्यस्य तस्य । २ प्रसादगुणललिताः । ३ पद्मपत्रशोभयाऽनुकृतनेत्रकान्ते । ४ मनः सरश्च ।

हंसि[1] त्वमापदमनेकविधां जनस्य ॥ १८ ॥
इच्छानुरूप[2]मनुरूपगुणप्रकर्ष ।
साङ्कर्षणि[3] त्वमनुसृत्य यदा बिभर्षि ॥
जायेत स त्रिभुवनैकगुरुस्तदानीं ।
देवः शिवोऽपि भुवनत्रयसूत्रधारः[4] ॥ १९ ॥
योऽयं चकास्ति गगनार्णवरत्नमिन्दु- ।
योऽयं सुरासुरगुरुः पुरुषः[5] पुराणः ॥
यद्वाममर्धमिदमन्धक[6]सूदनस्य ।
देवि ! त्वमेव तदिति प्रतिपादयन्ति[7] ॥ २० ॥

---

१ अपाकरोषि । २ सदृशम् । ३ हे कालाग्निरुद्रशक्ते । ४ नाटकाचार्यः । ५ नारायणः । ६ शिवस्य । ७ अंगीकुर्वन्ति ॥

ध्यातासि हैमवति[1] येन हिमांशुरश्मि-[2] ।
मालाऽमलद्युतिरकल्मषमानसेन[3] ॥
तस्याऽविलम्बमनवद्यमनन्तकल्प-[4][5] ।
मल्पैर्दिनैः सृजसि सुन्दरि वाग्विलासम्[6] ॥ २१ ॥
त्वां व्यापिनीति सुमना इति कुण्डलीति ।
त्वां कामिनीति कमलेति कलावतीति ॥
त्वां मालिनीति ललितेत्यपराजितेति ।
देवि ! स्तुवन्ति विजयेति जयेत्युमेति ॥ २२ ॥
उद्दाम[7]कामपरमार्थसरोजषण्ड- ।

---

१ पार्वति । २ शुक्लरूपा । ३ शुद्धान्तःकरणेन । ४ निर्दोषम् । ५ प्रभूततरम् । ६ वाङ्माधुर्यम्
७ अत्यन्ताभिलषणीयपरमार्थभूतमूलाधारादिषट्चक्रकमलवृन्दविकासे सूर्यदीप्तिम् ॥

चण्डद्युतिद्युतिमुपासितषट्[1]प्रकाराम् ॥
मोहद्विपेन्द्रकद[2]नोद्यतबोध[3]सिंह- ।
लीला[4]गुहां भगवतीं त्रिपुरां नमामि ॥ २३ ॥

गणेशवटु[5]कस्तुता रतिस[6]हायकामान्विता ।
स्मरारिवराविष्टरा कुसुमबाणबाणैर्युता ॥
अनंगकु[7]सुमादिभिः परिवृता च सिद्धैस्त्रि[8]भिः ।
कदम्बवनमध्यगा त्रिपुरसुन्दरी पातु नः ॥ २४ ॥

त्वामैन्द[9]वीमिव कलामनुभालदेश- ।

---

१ अङ्गीकृतषट्चक्रादिविशेषाम् । षट्चक्रप्रकारत उपासितां वा । २ विनाशः । ३ ज्ञानम् । ४ क्रीडावासस्थितिम् । ५ मायया वटुभूतो वामनावतारः को ब्रह्मा । ६ रतिप्रीत्यादिभिः स्वशक्तिभिः सहितैरेकोनपंचाशन्मिथुनरूपकामकामदादिभिरन्विता । ७ अष्टभिर्गुरुतरयोगिनीभिः । ८ दिव्यौघसिद्धौघमानवौघरूपैः । ९ चान्द्रीम् ॥

मुद्रासिताम्बरतलामवलोकयन्तः ॥
सद्यो भवानि ! सुधियः कवयो भवन्ति ।
त्वं [1]भावनाहितधियां कुल[2]कामधेनुः ॥ २५ ॥
उत्तप्तहेमरुचिरे त्रिपुरे ! पुनीहि ।
चेतश्चिरन्तनमघौघवनं लुनीहि ॥
कारागृहे नि[3]गडबन्धनपीडितस्य ।
त्वत्संस्मृतौ झटिति मे निगडास्त्रुटन्ति ॥ २६ ॥
[4]रुद्राणि विद्रुममयीं प्रतिमामिव त्वां ।
ये चिन्तयन्त्यरुणकान्तिमनन्यरूपाम् ॥
तानेत्य पद्मलदृशः [5]प्रसभं भजन्ते ।

---

१ ध्यानस्थितबुद्धीनाम् । २ सर्वप्रदेत्यर्थः । ३ शृंखला । ४ हे रुद्रशक्ते । ५ हठात् ॥

कण्ठावसक्तमृदुबाहुलतास्तरुण्यः ॥ २७ ॥

त्वद्रूपमुल्लसितदाडिमपुष्परक्त- ।
मुद्भावयेन्मदनदैवतमक्षरं यः ॥
तं रूपहीनमपि मन्मथनिर्विशेषं- ।
मालोकयन्त्युरुनितम्बभरास्तरुण्यः ॥ २८ ॥

त्वद्रूपैकनिरूपणप्रणयिताबन्धो दृशोस्त्वद्गुण- ।
ग्रामाकर्णनरागिता श्रवणयोस्त्वत्संस्मृतिश्चेतसि
त्वत्पादार्चनचातुरी करयुगे त्वत्कीर्तनं वाचि मे ।
कुत्रापि त्वदुपासनव्यसनिता मे देवि! मा शाम्यतु ।२६

१ कंठे आलिङ्गनार्थं स्थापिताः । २ विकसितम् । ३ ध्यायेत् । ४ कामसदृशमित्यर्थः ।
५ निश्चयकरणे सस्नेहता । ६ समूहः । ७ चातुर्यम् । ८ तत्परता राग इत्यर्थः ॥

य: स्तोत्रमेतदनुवासरमीश्वराया:[1] ।
श्रेयस्करं पठति वा यदि वा शृणोति ॥
तस्येप्सितं फलति राजभिरीड्यतेऽसौ ।
जायेत स प्रियतमो हरिणेक्षणानाम् ॥ ३० ॥
ब्रह्मेन्द्ररुद्रहरिचन्द्रसहस्रराश्मि-
स्कन्दद्विपाननहुताशनवन्दितायै ॥
वागीश्वरि ! त्रिभुवनेश्वरि ! विश्वमात-
रन्तर्बहिश्च कृतसंस्थितये नमस्ते ॥ ३१ ॥

इति श्रीपञ्चस्तव्यां चर्चास्तवो द्वितीयः

—0—

१ प्रतिदिनम् ।

घटस्तवस्तृतीयः ।

देवि ! त्र्यम्बकपत्नि ! पार्वति ! सति ! त्रैलोक्यमातः ! शिवे ! ।
शर्वाणि ! त्रिपुरे ! मृडानि ! वरदे ! रुद्राणि ! कात्यायनि ! ॥
भीमे ! भैरवि ! चण्डि ! शर्वरि ! कले ! कालक्षये ! शूलिनि ! ।
त्वत्पादप्रणताननन्य[1]मनसः पर्याकुलान्पाहि नः ॥ १ ॥
उन्मत्ता इव सग्रहा[2] इव विषव्यासक्त[3]मूर्च्छा इव ।
प्राप्तप्रौढमदा इवातिविरहग्रस्ता इवार्ता इव ॥
ये ध्यायन्ति हि शैलराजतनयां धन्यास्त एकाग्रत- ।
स्त्यक्तोपाधिविवृद्धरागमनसो ध्यायन्ति वामभ्रुवः ॥ २ ॥

---

१ त्वदेकाग्रमनसः । २ भूताद्याविष्टा इव । ३ उत्पन्नमोहाः ।

देवि ! त्वां सकृदेव[1] यः प्रणमति क्षोणीभृत[2]स्तं नम- ।
न्त्याजन्म स्फुरदंघ्रिपीठविलुठत्[3]कोटीरकोटिच्छटाः ॥
यस्त्वामर्चति सोऽर्च्यते सुरगणैर्यः स्तौति स स्तूयते ।
यस्त्वां ध्यायति तं स्मरार्तिविधुरा[4] ध्यायन्ति वामभ्रुवः[5] ॥३॥

ध्यायन्ति ये क्षणमपि त्रिपुरे ! हृदि त्वां ।
लावण्ययौवनधनैरपि विप्रयुक्ताः[6] ॥
ते विस्फुरन्ति[7] ललितायतलोचनानां ।
चित्तैकभित्तिलिखितप्रतिमाः[8] पुमांसः ॥ ४ ॥

---

१ एकवारमेव । २ राजानः । ३ लग्नमुकुटाग्रप्रान्ताः । ४ कामपीडाविह्वलाः । ५ सुन्दर्यः । ६ विरहिताः । ७ रमन्त इत्यर्थः । ८ चित्तरूपे चित्राश्रये लिखितमूर्तयः । अनुक्षणं विलासिनीभिर्ध्याता इत्यर्थः ।

एतं किं नु दृशा पिबाम्युत विशाम्यस्याङ्गमङ्गैर्निजैः ।
किं वाऽमुं निगलाम्यनेन सहसा किं वैकतामाश्रये ॥
तस्येत्थं विवशो[1] विकल्प[2]घटनाकूतेन योषिज्जनः ।
किं तद्यन्न करोति देवि! हृदये यस्य त्वमावर्तसे[3] ॥ ५ ॥
विश्वव्यापिनि! यद्वदीश्वर इति स्थाणावनन्याश्रयः ।
शब्दः शक्तिरिति त्रिलोकजननि! त्वय्येव तथ्यस्थितिः[4] ॥
इत्थं सत्यपि शक्नुवन्ति यदिमाः क्षुद्रा रुजो बाधितुं ।
त्वद्भक्तानपि न क्षिणोषि[5] च रुषा तद्देवि! चित्रं महत् ॥ ६ ॥
इन्दोर्मध्यगतां मृगाङ्कसदृशच्छायां मनोहारिणीं ।

---

१ पराधीनः । २ कथं कथं तेन सह रमे इति संकलपविशेषाभिप्रायेण । ३ पुनः पुनः स्फुरसि । ४ सत्यप्रतिष्ठः । ५ ता रुजः .

पाण्डूत्फुल्लसरोरुहासनगतां स्निग्ध[1]प्रदीपच्छविम् ॥
वर्षन्तीममृतं भवानि ! भवतीं ध्यायन्ति ये देहिन-
स्ते निर्मुक्तरुजो भवन्ति विपदः प्रोज्झन्ति तान्दूरतः ॥ ७ ॥
पूर्णेन्दोः शकलैरिवातिबहलैः पीयूषपूरै[2]रिव ।
क्षीराब्धेः लहरीभरैरिव सुधापङ्कस्य पिण्डैरिव ।
प्रालेयैरिव निर्मितं तव वपुर्ध्यायन्ति ये श्रद्धया ।
चित्तान्तर्निहतार्तितापविपदस्ते सम्पदं बिभ्रति ॥ ८ ॥
ये संस्मरन्ति तरलां सहसो[3]ल्लसन्तीं ।
त्वां [4]ग्रन्थिपञ्चकभिदं तरुणार्कशोणाम् ।

---

१ सतैलः । २ अमृतप्रवाहैः । ३ मूलाधारादुद्यन्तीम् । ४ स्वाधिष्ठानादिचक्रपंचकम् । अविद्यास्मितारागद्वेषाभिनिवेशाख्यं क्लेशपंचकं वा ।

रागार्णवे बहलरागिणि मज्जयन्तीं[1] ।
कृत्स्नं जगद्दधति[2] चेतसि तान्मृगाद्यः ॥ ९ ॥
लाक्षारसस्नपितपंकजतंतुतन्वी- ।
मन्तः स्मरत्यनुदिनं भवतीं भवानि! ॥
यस्तं स्मरप्रतिमम[3]प्रतिमस्वरूपा ।
नेत्रोत्पलैर्मृगदृशो भृशमर्चयन्ति ॥ १० ॥
स्तुमस्त्वां वाचमव्यक्तां[4] हिमकुन्देन्दुरोचिषम् ।
कदम्बमालां बिभ्राणामापादतललम्बिनीम् ॥ ११ ॥
मूर्ध्नीन्दोः सितपङ्कजासनगतां प्रालेयपाण्डुत्विषं ।

---

१ तन्मयीकुर्वंतीम् । २ धारयन्ति । ३ अत्युत्तमस्वरूपाः । ४ परारूपाम् ।

वर्षन्तीममृतं सरोरुहभुवो वक्त्रे[१]ऽपि रंध्रे[२]ऽपि च ॥
अच्छिन्ना[३] च मनोहरा[४] च ललिता[५] चातिप्रसन्ना[६]पि च ।
त्वामेव स्मरतां स्मरारिदयिते ! वाक्सर्वतो वल्गति[७] ॥ १२ ॥

ददातीष्टान्भोगान् क्षपयति रिपून् हन्ति विपदो ।
दहत्याधीन्[८]व्याधीञ् शमयति सुखानि प्रतनुते ॥
हठादन्तर्दुःखं दलयति पिनष्टीष्टविरहं ।
सकृद् ध्याता देवी किमिव निरवद्यं न कुरुते ॥ १३ ॥

यस्त्वां ध्यायति वेत्ति विन्दति जपत्यालोकते चिन्तय- ।
त्यन्वेति[९] प्रतिपद्यते[१०] कलयति[११] स्तौत्याश्रयत्य[१२]र्चति ॥

---

१ मूलाधारेऽपि । २ ब्रह्मरन्ध्रेऽपि । ३ ध्वनिगर्भत्वेनानर्गला । ४ निर्दोषत्वेन । ५ सालंकारत्वेन । ६ प्रसादादिगुणयुक्तत्वेन च । ७ अनवच्छिन्नत्वेन प्रसरति । ८ मानसीर्व्यथाः । ९ सेवकवदनुगच्छति । १० तांस्तान्नियमानङ्गीकरोति । ११ विचारयति । १२ शरण्यत्वेन ॥

यश्च त्र्यम्बकवल्लभे ! तव गुणानाकर्णयत्यादरा- ।
त्तस्य श्रीर्न गृहाद[1]पैति विजयस्तस्याग्रतो धावति ॥ १४ ॥

किं किं दुःखं दनुजदलिनि ! क्षीयते न स्मृतायां ।
का का कीर्तिः कुल[2]कमलिनि ! [3]ख्याप्यते न स्तुतायाम् ॥
का का सिद्धिः सुरवरनुते ! प्राप्यते नार्चितायां ।
कं कं योगं त्वयि न चि[4]नुते चित्तमा[5]लम्बितायाम् ॥१५॥

ये देवि ! [6]दुर्धरकृतान्तमुखान्तरस्था ।
ये कालि ! कालघनपाशनितान्तबद्धाः ॥
ये चण्डि ! चण्ड[7]गुरुकल्मषसिन्धुमग्ना- ।

---

१ अपगच्छति । २ षट्चक्रपद्मिनि । ३ विश्रूयते । ४ अधिगच्छति । ५ प्रापितायाम्
६ दुःसहः । ७ दुर्धर्षदुरन्तपापसागरब्रुडिताः ॥

स्तान्पासि मोचयसि तारयसि स्मृतैव ॥ १६ ॥
लक्ष्मीवशीकरणचूर्णसहोदराणि[1] ।
त्वत्पादपंकजरजांसि चिरं जयन्ति ॥
यानि प्रणाममिलितानि नृणां ललाटे ।
लुम्पन्ति[2] दैवलिखितानि दुरक्षराणि[3] ॥ १७ ॥
रे[4] मूढाः! किमयं वृथैव तपसा देहः परिक्लिश्यते ।
यज्ञैर्वा बहुदक्षिणैः किमितरे रिक्तीक्रियंते[5] गृहाः ॥
भक्तिश्चेदविनाशिनी भगवतीपादद्वयी सेव्यता- ।
मुन्निद्राम्बुरुहातपत्रसुभगा[6] लक्ष्मीः पुरो धावति ॥१८॥

---

१ सदृशानि । २ परिमार्जयन्ति । ३ दौर्भाग्यसूचकानि अक्षराणि । ४ नीचसंबोधनम्
५ शून्यीक्रियन्ते . ६ उत्फुल्लम् ॥

याचे न कंचन न कंचन वंचयामि ।
सेवे न कंचन निरस्तसमस्तदैन्यः ॥
श्लक्ष्णं[1] वसे[2] मधुरमद्मि भजे वरस्त्रीं ।
देवी हृदि स्फुरति मे कुलकामधेनुः[3] ॥ १९ ॥
शब्दब्रह्ममयि[4] स्वच्छे देवि त्रिपुरसुन्दरि ।
यथाशक्ति जपं पूजां गृहाण परमेश्वरि ॥ २० ॥
नन्दन्तु साधकाः सर्वे विनश्यन्तु विदूषकाः[5] ॥
अवस्था शाम्भवी मेऽस्तु प्रसन्नोऽस्तु गुरुः सदा ॥ २१ ॥
दर्शनात्पापशमनी जपान्मृत्युविनाशिनी ॥
पूजिता दुःखदौर्भाग्यहरा त्रिपुरसुन्दरी ॥ २२ ॥

---

१ कोमलम् । २ परिदधामि । ३ सुरभिवदखिलकामदा । ४ अनाहतध्वनिमयि । ५ निन्दका

नमामि यामिनीनाथलेखालंकृतकुन्तलाम् ॥[1]
भवानीं भवसन्तापनिर्वापणसुधानदीम् ॥ २३ ॥[2]
मंत्रहीनं क्रियाहीनं विधिहीनं च यद्गतम् ॥
त्वया तत्क्षम्यतां देवि कृपया परमेश्वरि ॥ २४ ॥

इति श्रीपंचस्तव्यां घटस्तवस्तृतीयः समाप्तः ।

---

१ चन्द्रलेखाशोभितालकाम् । २ संसारसंतापशान्तौ । अमृतनदीम् ।

अम्बास्तवश्चतुर्थः ।

ओं यामामनन्ति[1] मुनयः प्रकृतिं[2] पुराणीं ।
विद्येति यां श्रुतिरहस्यविदो वदन्ति ॥
तां[3]मर्धपल्लवितशङ्कररूपमुद्रां ।
देवीमनन्यशरणः शरणं प्रपद्ये[4] ॥ १ ॥

अम्ब स्तवेषु तव तावद्[5]कर्तृकाणि* ।
कुण्ठीभवन्ति वचसामपि गुम्फनानि[6] ॥
डिम्भस्य[7] मे स्तुतिरसावसमञ्जसापि[8] ।
वात्सल्यनिघ्न[9]हृदयां भवतीं [10]धिनोति ॥ २ ॥

---

१ प्रतिपादयन्ति । २ जगद्योनिं । ३ अर्धे प्रकटिता शंकररूपस्याकृतिर्यया । ४ व्रजामि । ५ साकल्येन । * शिवाद्या ऋषिपर्यन्ताः स्मर्तारोऽस्य न कारका इति वचनान्नास्ति कर्त्ता येषां तानि वैदिकानि इत्यर्थः । ६ रचनाविशेषाः । ७ बालस्य । ८ अनुचितापि । ९ अधीनम् १० प्रीणयति ॥

व्योमेति बिन्दु[1]रिति नाद[2] इतीन्दुलेखा- ।
रूपेति वा[3]ग्भवतनूरिति मा[4]तृकेति ॥
निःष्यन्द[5]मानसुखबोधसुधास्वरूपा ।
विद्योतसे मनसि भाग्यवतां जनानाम् ॥ ३ ॥
आविर्भवत्पुल[6]कसन्ततिभिः शरीरै- ।
[7]र्निष्यन्दमानसलिलैर्नयनैश्च नित्यम् ॥
वाग्भिश्च गद्गदपदाभिरुपासते ये ।
पादौ तवाम्ब भुवनेषु त एव धन्याः ॥ ४ ॥
वक्त्रं य[8]दुद्यतमभिष्टुतये भवत्या- ।

१ ज्ञानं । २ विमर्शः । ३ वाग्बीजरूपा । ४ अकारादिक्षकारांता । ५ स्रवदानन्दज्ञानामृतरूपा । ६ रोमाञ्चः । ७ उपलक्षिताः । ८ उद्यमयुक्तम् उपरिक्तमित्यर्थः ॥

स्तुभ्यं नमो यदपि देवि शिरः करोति ॥
चेतश्च यत्त्वयि परायणमम्ब तानि ।
कस्यापि कैरपि भवन्ति तपोविशेषैः ॥ ५ ॥
मूला[१]लवालकुहरादुदिता भवानि ।
निर्भिद्य षट्सरसिजानि तडिल्लतेव ॥
[२]भूयोऽपि तत्र विशसि ध्रुव[३]मंडलेन्दु- ।
निःष्यन्दमानपरमामृततोयरूपा ॥ ६ ॥
दग्धं यदा मदनमेकमनेकधा ते ।
[४]मुग्धः कटाक्षविधिर[५]ङ्कुरयांचकार ॥

---

१ मूलाधाररंध्रात् । २ अवरोहे । ३ अक्षीणमंडलब्रह्मरंध्रवर्तिन इन्दोः सकाशात ।
४ सुन्दरः । ५ जनयामास ।

धत्ते तदाप्रभृति देवि ललाटनेत्रं ।
सत्यं ह्रियेव मुकुलीकृतमिन्दुमौलिः ॥ ७ ॥

अज्ञातसंभवमनाकलितान्ववायं ।
भिक्षुं कपालिनमवाससमद्वितीयम् ॥
पूर्वं करग्रहणमङ्गलतो भवत्याः ।
शम्भुं क एव बुबुधे गिरिराजकन्ये! ॥ ८ ॥

चर्माम्बरं च शवभस्मविलेपनं च ।
भिक्षाटनं च नटनं च परेतभूमौ ॥
वेतालसंहतिपरिग्रहता च शम्भोः ।
शोभां बिभर्ति गिरिजे तव साहचर्यात् ॥ ९ ॥

---

१ निमीलितम् । २ अज्ञातकुलम् । ३ विवाहात् । ४ श्मशाने । ५ परिवारत्वम् ॥

कल्पोपसंहरण[1]केलिषु पण्डितानि ।
चण्डानि खण्डपरशोरपि ताण्डवानि ॥
आलोकनेन तव कोमलितानि मात-
र्लास्यात्मना परिण[2]मन्ति जगद्विभूत्यै ॥ १० ॥
जन्तोरपश्चिमतनो[3]: सति कर्मसाम्ये ।
निश्शेष[4]पाशपटलच्छिदुरा निमेषात् ॥
कल्याणि ! दैशिक[5]कटाक्षसमाश्रयेण ।
कारुण्यतो भवसि शाम्भववेददीक्षा ॥ ११ ॥
मुक्ताविभूषणवती नवविद्रुमाभा ।

---

१ कल्पान्तक्रीडासु । २ रूपान्तरमापादयंति । ३ अग्रे जन्माभाववतः । ४ कलादिपाशसमूहच्छेत्री । ५ गुरुवरः ॥

यच्चेतसि स्फुरसि तारकितेव सन्ध्या ॥
एकः स एव भुवनत्रयसुन्दरीणां ।
कन्दर्पतां व्रजति पञ्चशरीं विनापि ॥ १२ ॥
ये भावयन्त्यमृतवाहिभिरंशुजालै-[1] ।
राप्यायमानभुवनाममृतेश्वरीं त्वाम् ॥
ते लङ्घयन्ति ननु मातरलङ्घनीयां ।
ब्रह्मादिभिः सुरवरैरपि कालकक्ष्याम्[2] ॥ १३ ॥
यः स्फाटिकाक्षगुणपुस्तककुण्डिकाढ्यां ।
व्याख्यासमुद्यतकरां शरदिन्दुशुभ्राम् ॥
पद्मासनां च हृदये भवतीमुपास्ते ।

१ करणमंडलनिःसृतैश्चिन्मरीचिभिः । २ मर्यादाम् ॥

मातः स विश्वकवितार्किकचक्रवर्ती ॥ १४ ॥

बर्हा[1]वतंसयुतबर्बरकेशपाशां ।
गुञ्जा[2]वलीकृतघनस्तनहारशोभाम् ॥
श्यामां प्रवाल[3]वदनां[++] सुकुमार[4]हस्तां ।
त्वामेव नौमि शबरीं शबरस्य जायाम् ॥ १५ ॥

अर्धेन किं नवलताल[5]लितेन मुग्धे ।
क्रीतं विभोः प[6]रुषमर्धमिदं त्वयेति ।
आ[7]लीजनस्य परिहासवचांसि मन्ये ।
मन्दस्मितेन तव देवि जडीभवन्ति ॥ १६ ॥

---

१ मयूरपिच्छम् । २ अरण्यजैः फलविशेषैः । ३ विद्रुमवत् । ४ कोमलकराम् ।
५ कोमलेन । ६ कठिनम् । ७ सखी । ++ रदनामित्यपि पाठः ॥

ब्रह्माण्डबुद्बुद[1]कदम्बकसंकुलो[2]ऽयं ।
मायोदधिर्विविधदुःखतरङ्गमालः ॥
आश्चर्यमम्ब झटिति प्रलयं प्रयाति ।
त्वद्ध्यानसंततिमहावडवामुखाग्नौ ॥ १७ ॥
दाक्षायणीति कु[3]टिलेति गुं[4]हारणीति ।
कात्यायनीति कमलेति कलावतीति ॥
एका सती भगवती परमार्थतोऽपि ।
संदृश्यसे बहुविधा ननु नर्तकीव ॥ १८ ॥
आनन्दलक्षणमनाहत[5]नाम्नि देशे ।

१ जलबिन्दुविकाराः । २ पूर्णः । ३ कुण्डलिनीरूपतया । ४ चिद्दीप्तिसंदीपिनीत्वात् । ५ हृच्चक्रे ॥

नादात्मना[1] परिणतं तव रूपमीशे ॥
प्रत्यङ्मुखेन[2] मनसा परिचीयमानं[3] ।
शंसन्ति नेत्रसलिलैः पुलकैश्च धन्याः ॥ १९ ॥
त्वं चन्द्रिका शशिनि तिग्मरुचौ रुचिस्त्वं ।
त्वं चेतनासि पुरुषे पवने बलं त्वम् ॥
त्वं स्वादुतासि सलिले शिखिनि त्वमूष्मा ।
निःसारमेतदखिलं त्वदृते[4] यदि स्यात् ॥ २० ॥
ज्योतींषि[5] यद्दिवि चरन्ति यदन्तरिक्षं ।
सूते पयांसि यदहिर्धरणीं च धत्ते ॥
यद्वाति वायुरनलो यदुदर्चिरास्ते ।

१ शब्दरूपेण । २ अंतर्मुखेन । ३ अभ्यस्यमानम् । ४ त्वां विना । ५ताराः ॥

तत्सर्वमम्ब तव केवलमाज्ञयैव ॥ २१ ॥

सङ्कोचमिच्छसि यदा गिरिजे तदानीं ।
वाक्तर्कयोस्त्वमसि भूमिरनामरूपा[1] ॥
यद्वा विकासमुपयासि यदा तदानीं ।
त्वन्नामरूपगणनाः सुकरीभवन्ति ॥ २२ ॥

भोगाय देवि भवतीं कृतिनः प्रणम्य ।
भ्रूकिंकरीकृत[2]सरोजगृहासहस्राः ॥
चिन्तामणिप्रचय[3]कल्पितकेलिशैले ।
कल्पद्रुमोपवन एव चिरं रमन्ते ॥ २३ ॥

---

१ वाङ्मनोगोचरातीतेत्यर्थः । २ भ्रुवोः किंकरीकृतं भ्रूविक्षेपमात्रेणैव प्रणिहितं लक्ष्मीसहस्रं यैस्ते । ३ राशिः ॥

हन्तुं त्वमेव भवसि त्वदधीनमीशे ।
संसारतापमखिलं दयया पशूनाम्[१] ॥
वैकर्तनी[२] किरणसंहतिरेव शक्ता ।
घर्मं निजं शमयितुं निजयैव वृष्ट्या ॥ २४ ॥

शक्तिः[३] शरीरमधिदैवतमन्तरात्मा[४] ।
ज्ञानं[५] क्रिया[६] करणमासनजालमिच्छा ॥
ऐश्वर्यमायतनमावरणानि च त्वं ।
किं तन्न यद्भवसि देवि शशाङ्कमौलेः ॥ २५ ॥

भूमौ निवृत्तिरुदिता पयसि प्रतिष्ठा ।

---

१ पश्यन्ति सामान्यवत्पशवो जीवाः । २ सावित्री । आदित्याज्जायते वृष्टिरित्युक्तेः । ३ परा चिद्रूपा शक्तिः । ४ जीवात्मा । ५ ज्ञानात्मकं मनः । ६ क्रियात्मकः प्राणः ॥

विद्यानले मरुति शान्तिरतीतशान्तिः ॥
व्योम्नीति याः किल कला[1]ः कलयन्ति विश्वं ।
तासां विदूरतरमम्ब ! पदं[2] त्वदीयम् ॥ २६ ॥

यावत्पदं[3] पदसरोजयुगं त्वदीयं ।
नाङ्गीकरोति हृदयेषु जगच्छरण्ये ॥
तावद्विकल्पजटिला[4]ः कुटिलप्रकारा- ।
स्तर्कग्रहाः समयिनां[5] प्रलयं न यान्ति ॥ २७ ॥

यद्देवयान[6]पितृयानविहारमेके[7] ।

---

१ कला नाम जगत्कर्तृत्वरूपा शक्तिर्बहिर्मुखत्वमापन्ना। अत्र तु भूम्यादिपदैर्मूलाधारादि-चक्राणि लक्ष्यन्ते । २ चैतन्यस्वरूपम् । ३ स्थानम् । ४ दुर्बोधाः । ५ मतवादिनाम् । ६ प्राणापानाभ्यामिडापिंगलयोः संचारं कृत्वा । ७ मुख्या योगिनः ॥

कृत्वा मनः करण[1]मंडलसार्वभौमम् ॥

[2]याने निवेश्य तव कारण[3]पञ्चकस्य ।

[4]पर्वाणि पार्वति नयन्ति निजासनत्वम् ॥ २८ ॥

स्थूलासु मूर्तिषु महीप्र[5]मुखासु मूर्तेः ।

कस्याश्चनापि तव वैभवमम्ब यस्याः ॥

[6]पत्या गिरामपि न शक्यत एव वक्तुं ।

सासि स्तुता किल मयेति तितिक्षि[7]तव्यम् ॥ २९ ॥

कालाग्निकोटिरुचिमम्ब ! षडध्वशुद्धा- ।

---

१ इन्द्रियसमूहचक्रवर्तिनम् । २ शक्तिमार्गे । ३ शक्तेः पंचकारणासनत्वाच्छक्तिस्वरूपा भवन्तीत्यर्थः । ४ शिरांसि । ५ मध्यात् । ६ ब्रह्मणापि । ७ क्षन्तव्यम् । ८ वर्णपदमंत्रतत्त्वभुवनकलाख्यषडध्वरूपदेहशोधने ॥

वाप्लावनेषु भवतीममृतौघवृष्टिम् ॥
श्यामां घनस्तनतटां स[1]कलीकृतौ च ।
ध्यायन्त एव जगतां गुरवो भवन्ति ॥ ३० ॥
विद्यां परां कतिचिदम्ब[2]रमम्ब केचि[3]- ।
दानन्दमेव क[4]तिचित्क[5]तिचिच्च माया[6]म् ॥
त्वां विश्वमाहुरप[7]रे वय[8]मामनाम ।
साक्षादपारकरुणां गुरुमूर्तिमेव ॥ ३१ ॥
कुवलयदलनीलं बर्बरस्निग्धकेशं ।
पृथुतरकुचभाराक्रान्तकान्तावलग्न[9]म् ॥

---

१ चिद्रसाश्यानत्वेन देहोत्पादने । २ शून्यम् । ३ बौद्धाः । ४ वेदान्तिनः । ५ नैयायिकाः । ६ भेदप्रथाम् । ७ चार्वाकाः । ८ शाक्ताः । ९ मध्यम् ॥

किमिह बहुभिरुक्तैस्त्वत्स्वरूपं परं नः ।
सकलभुवनमातः सन्ततं सन्निधत्ताम्[1] ॥ ३२ ॥

इति श्रीपञ्चस्तव्यां चतुर्थोऽम्बास्तवः
समाप्तः ।

१ सान्निहितं भवतात् ।

सकलजननीस्तवः पञ्चमः ॥

अजानन्तो[1] यान्ति क्षयमवशमन्योन्यकलहै- ।
रमी मायाग्रन्थौ तव परिलुठन्तः[2] समयिनः[3] ॥
जगन्मातर्जन्मज्वरभयतमःकौमुदि[4] ! वयं ।
नमस्ते कुर्वाणाः शरणमुपयामो भगवतीम् ॥ १ ॥
वचस्तर्कागम्यस्वरसपरमा[5]नन्दविभव- ।
प्रबोधाकाराय द्युति[6]तुलितनीलोत्पलरुचे ॥
शिवस्याराध्याय स्तनभरविनम्राय सततं ।
नमो यस्मै कस्मैचन भवतु मुग्धाय[7] महसे ॥ २ ॥

---

१ त्वत्स्वरूपमिति शेषः । २ परिवर्तमानाः । ३ मतभेदवादिनः । ४ संबोधनम् । ५ सूक्ष्मरूपेण । ६ स्थूलरूपेण । ७ मनोज्ञाय ॥

त्रुटद्गुञ्जाहारस्तनभरनमन्म[1]ध्यलतिका- ।
मुद[2]ञ्चद्धर्माम्भःकण[3]गुणितनीलोत्पलरुचम् ॥
शिवं पार्थत्राणप्रवण[4]मृगयाकारगुणितं ।
शिवामन्वग्यान्तीं शवरमहमन्[5]वेमि शवरीम् ॥ ३ ॥
मिथः केशा[6]केशिप्रधननिधनास्तर्कघटना- ।
बहुश्रद्धाभक्तिप्र[7]णयविषयाश्चाप्तविधयः ॥
प्रसीद प्रत्यक्षीभव गिरिसुते! देहि शरणं ।
निराल[8]म्बं चेतः परिलु[9]ठति पारि[10]प्लवमिदम् ॥ ४ ॥
शुनां वा वह्नेर्वा खगपरिष[11]दो वा यदशनं ।

---

१ अवलम्बलताम् । २ निःसरत् । ३ उपशोभितम् । ४ अर्जुनरक्षातत्परेण मृगयाकारोचितेन वेषेण कृतशोभम् । ५ शरणं प्रपद्ये । ६ केशेषु केशेषु गृहीत्वा यद्युद्धं प्रवृत्तम् । ७ प्राप्तिः । ८ निराश्रयम् । ९ परिवर्तते । १० चंचलम् । ११ पंक्तेः ॥

कदा केन क्वेति क्वचिदपि न कश्चित्कलयति[1] ॥
अमुष्मिन्विश्वासं विजहिहि[2] ममाह्नाय[3,4] वपुषि ।
प्रपद्येथाश्चेतः सकलजननीमेव शरणम् ॥ ५ ॥

अनाद्यन्ताभेदप्रणयरसिकापि प्रणयिनी ।
शिवस्यासीर्यत्त्वं परिणयविधौ देवि ! गृहिणी ॥
सवित्री[5] भूतानामपि यदुदभूः[6] शैलतनया ।
तदेतत्संसारप्रणयन[7]महानाटकसुखम् ॥ ६ ॥

ब्रुवन्त्येके[8] तत्त्वं भगवति ! सदन्ये[9] विदुरसत् ।
परे[10] मातः ! प्राहुस्तव सदसदन्ये सुकवयः ॥

---

१ गणयति । २ त्यज । ३ मदीयमिदं वपुरिति विश्वासम् । ४ द्रुतम् । ५ उत्पादयित्री
६ उत्पन्ना । ७ संपादनं । ८ सांख्याः । ९ बौद्धाः । १० तार्किकाः ॥

परे[1] नैतत्सर्वं समभिदधते देवि ! सुधिय- ।
स्तदेतत्त्वन्मायाविलसितमशेषं ननु शिवे ! ॥ ७ ॥

तडित्कोटिज्योतिर्द्युतिदलितषड्ग्रन्थि[2]गहनं ।
प्रविष्टं स्वाधारं[3] पुनरपि[4] सुधावृष्टिवपुषा ॥
किमप्यष्टात्रिंशत्[5]किरणसकलीभूतमनिशं ।
भजे धाम श्यामं कुचभरनतं बर्बरकचम् ॥ ८ ॥

चतुष्पत्रान्तः षड्[6]दलभगपुटान्तस्त्रिवलय- ।
स्फुरद्विद्युद्वह्निद्युमणिनियुता[7]भद्युतियुते ! ॥

---

१ वेदान्तिनः । न सत्तन्नासदुच्यते इति श्रुतेः । २ षट्चक्राण्येव वनम् । ३ मूलाधारम् । ४ अवरोहे । ५ द्वादशकिरणप्राणसूर्यरूपेण षोडशकिरणापानसोमरूपेण दशकिरणोदानानलरूपेण । ६ षट्कोणत्रिकोणमध्ये । ७ असंख्याः ॥

षडश्रं[1] भित्त्वादौ [2]दशदलमथ [3]द्वादशदलं ।
कला[4]श्रं च [5]द्व्यश्रं [6]गतवति ! नमस्ते गिरिसुते ॥ ९ ॥
[7]कुलं केचित्प्राहु[8]र्वपुरकुलमन्ये तव बुधाः ।
परे *तत्सम्भेदं समभिदधते कौलं[9]मपरे ॥
चतुर्णामप्येषामुपरि किमपि प्राहुरपरे ।
म[11]हामाये ! तत्त्वं तव कथममी निश्चिनुमहे ॥ १० ॥
षड[12]ध्वारण्यानीं प्रलयरविकोटि[13]प्रतिरुचा ।

---

१ षड्दलं स्वाधिष्ठानचक्रम् । २ मणिपूरकम् । ३ अनाहतचक्रम् । ४ विशुद्धिचक्रम् । ५ आज्ञाचक्रम् । ६ ब्रह्मरंध्रं प्राप्तवति । ७ षट्त्रिंशत्तत्त्वात्मकम् । ८ स्वरूपम् । ९ परमशिवरूपम् . * तयोः संयोगरूपम् । १० शक्तिरूपम् । ११ विद्यातत्त्वादारभ्य शिवतत्त्वं तावद्व्याप्तिमती शक्तिर्महामाया । १२ वर्णादयः . १३ सदृश्या ॥

रुचा भस्मीकृत्य स्वपदकमलप्रह्[1]वांशिरसाम् ॥
वितन्वानः शैवं किमपि वपुरिन्दीवररुचिः ।
कुचाभ्यामानम्रः शिवपु[2]रुषकारो विजयते ॥ ११ ॥
प्रका[3]शानन्दाभ्यामविदित[4]चरीं मध्य[5]पदवीं ।
प्रविश्यैतद्द्व[6]न्द्वं रविशशिसमाख्यं क[7]वलयन् ॥
प्रविश्योर्ध्वं [8]नादं लयद[9]हनभस्मीकृतकुलः ।
प्रसादात्ते जन्तुः शिवमं[10]कुलमम्ब ! प्रविश[11]ति ॥ १२ ॥
प्रियङ्गुश्यामाङ्गीमरुणतरवासःकिसलयां ।

---

१ नम्रम् । २ अहमित्येवंरूपा शक्तिः । ३ चिद्विमर्शाभ्याम् । ४ ज्ञानात्पूर्वमविदिताम् । ५ सुषुम्णामार्गम् । ६ प्राणापानाख्यम् । ७ चिद्रूपेविलापयन् । ८ सर्वोत्तीर्णं ब्रह्मरन्ध्रम् । ९ चिद्विश्रान्तिवह्निना विस्मारितदेहाहंभावः । १० तत्त्वोत्तीर्णं । ११ चिद्रूपे निलीनो भवति ।

[1]समुन्मीलन्मुक्ताफलबहुलनेपथ्यकुसुमाम् ॥
स्तनद्वन्द्वस्फारस्तबकनमितां कल्पलतिकां ।
सकृद्ध्यायन्तस्त्वां दधति शिवचिन्तामणिपदम् ॥१३॥
षडा[2]धारावर्तैरपरिमितमन्त्रोर्मिपटलै- ।
श्चलन्मुद्राफेनैर्बहुविधलसद्दैवतझषैः[3] ॥
क्रमस्रोतोभिस्त्वं वहसि परै[4]र्नादामृतनदी ।
भवानि ! प्रत्यग्रा शिवचिदमृताब्धिप्रणयिनी ॥ १४ ॥
महीपा[5]थोवह्निश्वसनवियदा[6]त्मेन्दुरविभि- ।
र्वपुर्भि[7]र्ग्रस्तांशै[8]रपि तव कियानम्ब ! महिमा ॥

---

१ विलसत् । २ षडाम्नायजलभ्रमैः । ३ मत्स्यैः । ४ पूर्णविमर्शामृतनदी । ५ जलम् ।
६ यजमानः । ७ मूर्तिभिः । ८ अंशविभागरहितैः पूर्णैरित्यर्थः

अमून्यालोकयन्ते भगवति ! न कुत्राप्यणुतरा- ।
मवस्थां प्राप्तानि त्वयि तु पर[1]मव्योमवपुषि ॥ १५ ॥
मनुष्यास्तिर्यञ्चो मरुत इति लोकत्रयमिदं ।
भवाम्भोधौ मग्नं त्रिगुणलहरीकोटिलुठितम् ॥
कटाक्षश्चेदत्र क्वचन तव मातः ! करुणया ।
शरीरी सद्योऽयं व्रजति परमानन्दतनुताम् ॥ १६ ॥
[2]कलां प्रज्ञा[3]माद्यां सम[4]यमनु[5]भूतिं समरसां ।
गुरुं पार[6]म्पर्यं विनयमुपदेशं शिवकथाम् ॥
प्रमाणं निर्वाणं परममतिभूतिं परगु[7]हां ।

---

१ परमाकाशस्वरूपायाम् । २ क्रियाशक्तिम् । ३ ज्ञानशक्तिम् । ४ सदाचारम् । ५ इदमहमित्येवंरूपमनुभवम् । ६ परम्परोपदेशम् । ७ मायाख्याम् ॥

विधिं विद्यामाहुः सकलजननीमेव मुनयः ॥ १७ ॥

प्रलीने शब्दौघे[1] तदनु विरते बिन्दुविभवे[2] ।
ततस्तत्त्वे[3] चाष्टध्वनिभिर[4]नुपाधिन्युपरते ॥
श्रिते शाक्ते पर्वण्यनु[5]कलितचिन्मात्रगहनां ।
स्वसंवित्तिं योगी रसयति[6] शिवाख्यां परतनुम्[7] ॥१८॥

परानन्दाकारां निरवधिशिवैश्वर्यवपुषं ।
निराकारज्ञानप्रकृति[8]मनवाच्छिन्नकरुणाम् ॥
संवित्रीं[9] भूतानां निरतिशय[10]धामास्पदपदां ।
भवो वा मोक्षो वा भवतु भवतीमेव भजताम् ॥१९॥

---

१ प्रत्याहारेण निवृत्ते शब्दादिविषयौघे । २ ऐन्द्रियिकज्ञानविस्तारे । ३ चिदात्मपरामर्शे । ४ अकचटतपयशाष्टकवर्गात्मकध्वनिभिः । ५ अन्ववशिष्टाचिन्मात्रदुरवगाहां । ६ चमत्करोति ७ उत्कृष्टं स्वरूपम् । ८ योनिम् । ९ उत्पादयित्रीम् । १० परमशिवस्वरूपाम् ॥

जगत्काये[1] कृत्वा तमपि[2] हृदये तच्च[3] पुरुषे ।
पुमांसं बिन्दुस्थं[4] तमपि[5] परनादाख्यगहने ॥
तदेतज्ज्ञानाख्ये[6] तदपि[7] परमानन्दविभवे ।
महाव्योमाकारे[8] त्वदनुभवशीलो[9] विजयते ॥ २० ॥
विधे विद्ये वेद्ये विविधसमये[10] वेदजननि ।
विचित्रे विश्वाद्ये विनयसुलभे वेदगुलिके[11] ॥
शिवाज्ञे शीलस्थे शिवपदवदान्ये[12] शिवनिधे ।

---

१ भावनया ध्यात्वा । २ कायम् । देहसारत्वात् । ३ तच्च हृदयम् । तदाश्रयत्वात् । ४ ज्ञानाश्रयम् । ५ तं बिन्दुमपि चिद्रूपे महाशून्ये । ६ शून्यं स्वात्मपरामर्शरूपे । ७ ज्ञानं स्वात्मप्रकाशानन्दमये । ८ हे महाशून्यरूपे । ९ योगी । १० नानासिद्धान्तभूते । ११ चतुर्वेदसारभूते । १२ दात्रि ॥

शिवे मातर्मह्यं त्वयि वितर भक्तिं निरुपमाम् ॥२१॥
विधेर्मुण्डं[1] हृत्वा यदकुरुत पात्रं[2] करतले ।
हरिं शूलप्रोतं यदगमयदंसाभरणताम् ॥
अलंचक्रे कण्ठं यदपि गरलेनाम्ब गिरिशः ।
शिवस्थायाः शक्तेस्[3]तदिदमखिलं ते विलसितम् ॥ २२ ॥
विरिञ्च्याख्या मातः ! सृजसि हरिसंज्ञा त्वमवसि ।
त्रिलोकीं रुद्राख्या हरसि विदधासीश्वरदशाम्[4] ॥
भवन्ती सादाख्या[5] शिवयसि च पाशौघ[6]दलिनी ।
त्वमेवैकानेका भवसि कृतभेदैर्गिरिसुते ॥ २३ ॥

---

१ ब्रह्मणः शिरः । २ कपालस्वरूपम् । ३ सामर्थ्यरूपायाः । ४ ईश्वरस्वरूपम् । ५ सदाशिवरूपा शिवात्मकतां सम्पादयसि । ६ कलादिपाशसमूहं खण्डयित्री ॥

मुनीनां चेतोभिः प्रमृदित[1]कषायैरपि मनाग् ।
अशक्ये संस्प्रष्टुं चकितैचकितै[2]रम्ब सततम् ॥
श्रुतीनां[3] मूर्धानः प्रकृतिकठिनाः[4] कोमलतरे ।
कथ ते विन्दन्ते पदकिसलये पार्वति पदम् ॥ २४ ॥

ताडिद्वल्लीं नित्याममृतसरितं पाररहितां ।
मलोत्तीर्णां[5] ज्योत्स्नां प्रकृतिम[6]गुणै[7]र्ग्रन्थिगहनाम् ॥
गिरां दूरां विद्यामविनतकुचां[8] विश्वजननी- ।
मपर्यन्तां लद्मीमभिदधाति सन्तो भगवतीम् ॥२५॥

शरीरं क्षित्य[9]म्भःप्रभृतिरचितं केवलमिदं ।

---

१ नाशितरागद्वेषमोहैः । २ अतिभीतैः । ३ उपनिषदात्मकाः । ४ स्वभावतो दुर्बोधाः । ५ मलरहिताम् । ६ मायाम् । ७ गुणाः सत्त्वादयः । ८ वृद्धामित्यर्थः । ९ जडस्वरूपमित्यर्थः ॥

सुखं दुःखं चायं कलयति[१] पुमांश्चेतन[२] इति ॥
स्फुटं[३] जानानोऽपि प्रभवति न देही रहयितुं[४] ।
शरीराहंकारं तव समय[५]बाह्यो गिरिसुते ॥ २६ ॥
पिता माता भ्राता सुहृदनुचरः सद्म गृहिणी ।
वपुः पुत्रो मित्रं धनमपि यदा[६] मां विजहति ॥
तदा मे भिन्दाना सपदि भयमोहान्धतमसं[७] ।
महाज्योत्स्ने[८] मातर्भव करुणया सन्निधिकरी ॥ २७ ॥
सुता दक्षस्यादौ[९] किल सकलमातस्त्वमुद्भूः[१०] ।

---

१ अनुभवति . २ चेतनत्वादित्यर्थः . ३ देहचिदात्मनोर्भेदम् . ४ त्यक्तुम् . ५ त्वदनुग्रहबहिर्भूतः . ६ परलोकोन्मुखगमनावसरे . ७ गाढध्वान्तम . ८ चन्द्रादिज्योतिषां प्रकाशकारिणीत्वात् महाज्योत्स्नात्वम् । ९ दक्षप्रजापतेः । १० समजनि ॥

सदोषं[1] तं हित्वा तदनु गिरिराजस्य[2] तनया ॥
अनाद्यन्ता शम्भोरपृथगपि शक्तिर्भगवती ।
विवाहाज्जायासीत्यहह[3][4] चरितं वेत्ति तव कः ॥२८॥
कणास्त्वद्दीप्तीनां[5] रविशशिकृशानुप्रभृतयः ।
परं ब्रह्म क्षुद्रं तव नियतमानन्दकणिका ॥
शिवादि क्षित्यन्तं त्रिवलयतनोः सर्वमुदरे[6] ।
तवास्ते भक्तस्य स्फुरसि हृदि चित्रं[7] भगवति ॥२९॥
त्वया यो जानीते[8] रचयति[9] भवत्यैव सततं ।

---

१ सापराधम् । २ हिमालयस्य । ३ भवसि । ४ अहहेत्याश्चर्ये । ५ लेशाः । ६ अनेन भगवत्या अतिविशालता सूचिता । ७ यस्यां सर्वं माति तस्या हृदयैकदेशे स्फुरणमत्याश्चर्यकारीत्यर्थः । ८ इति ज्ञानशक्तिस्त्वमेव . ९ क्रियाशक्तिरपि त्वमेव ॥

त्वयैवेच्छत्यम्ब[1] ! त्वमसि निखिला यस्य[2] तनवः ॥
गतः[3] स्वाम्यं शम्भुर्वहति परमं व्योम भवती ।
तथाप्येवं हित्वा विहरति शिवस्येति किमिदम् ॥३०॥
पुरः पश्चादन्तर्बहिरपरिमेयं परिमितं ।
परं स्थूलं सूक्ष्मं सकुलम[4]कुलं[5] गुह्यमगुहम् ॥
दवीयो[6] नेदीयः[7] सदसदिति विश्वं भगवतीं ।
सदा पश्यन्त्या[8]ज्ञां वहसि भुवनक्षोभजननीम् ॥ ३१ ॥

---

१ इच्छाशक्तिरपि त्वमेव । २ शिवस्याष्टौ मूर्तयः । ३ परमं व्योम शून्यरूपत्वं गतः प्राप्तोपि स्वाम्यं शक्तिमत्वं शंभुर्वहति तथाप्येवं शिवस्य शून्यरूपत्वं हित्वोपेक्ष्य भवती शिवस्य सम्बन्धिनी शक्तिरहमिति विहरति क्रीडति इति यदभावस्य भावत्वसम्पादनं तदतीवाश्चर्यम् । ४ जगत् । ५ शिवः । ६ दूरम् । ७ निकटम् । ८ साक्षात्कुर्वन्ति ॥

मयूखाः पूषणीव[1] ज्वलन इव तद्दीप्तिकणिकाः ।
पयोधौ कल्लोलप्रतिहितमहिम्नीव पृषतः[2] ॥
उदेत्योदेत्याम्ब त्वयि सह निजैस्तात्त्विककुलै-[3] ।
र्भजन्ते तत्त्वौघाः[4] प्रशममनुकल्पं परवशाः[5] ॥ ३२ ॥
विधुर्विष्णुर्ब्रह्मा प्रकृतिरणुरात्मा[6][7] दिनकरः ।
स्वभावो जैनेन्द्रः सुगतमुनिराकाशमनिलः ॥
शिवः शक्तिश्चेति श्रुतिविषयतां तामुपगतां ।
विकल्पैरेभिस्त्वामभिदधति सन्तो भगवतीम् ॥ ३३ ॥
प्रविश्य स्वं मार्गं[8] सहजदयया दैशिकदृशा[9] ।

---

१ सूर्ये । २ बिन्दवः । ३ तत्त्वानां स्वस्वकार्यसमूहैः । ४ शिवादयः । ५ त्वदधीनाः । ६ जीवः ७ परमात्मा । ८ सुषुम्णामार्गम् । ९ गुरुवरानुग्रहदृष्ट्या ॥

षडध्वध्वान्तौघच्छिदुरगणनातीतकरुणाम् ॥
परानन्दाकारां सपदि शिवयन्तीमपि तनुं ।
स्वमात्मानं धन्याश्चिरमुपलभन्ते भगवतीम् ॥ ३४ ॥
शिवस्त्वं शक्तिस्त्वं त्वमसि समया त्वं समयिनी ।
त्वमात्मा त्वं दीक्षा त्वमयमणिमादिर्गुणगणः ॥
अविद्या त्वं विद्या त्वमसि निखिलं त्वं किमपरं ।
पृथक्तत्त्वं त्वत्तो भगवति न वीक्षामह इमे ॥ ३५ ॥
असंख्यैः प्राचीनैर्जननि जननैः कर्मविलया-।
द्रुते जन्मन्यन्तं गुरुवपुषमासाद्य गिरिशम् ॥
अवाप्याज्ञां शैवीं क्रमतनुरपि त्वां विदितवान् ।

[1] भुवनाद्यध्वरूपः संसारः । [2] आनन्दयन्तीम् । [3] कर्मलोपात् । [4] गुरुस्वरूपम् ॥

नयेयं त्वत्पूजास्तुतिविरचनेनैव दिवसान् ॥ ३६ ॥

यत्षट्पत्रं कमलमुदितं तस्य या कर्णिकाख्या ।
योनिस्तस्याः प्रथितमुदरे यत्तदोङ्कारपीठम् ॥
तस्मिन्नन्तः कुचभरनतां कुण्डलीतः प्रवृत्तां ।
श्यामाकारां सकलजननीं सन्ततं भावयामि ॥ ३७ ॥

भुवि पयसि कृशानौ मारुते खे शशाङ्के ।
सवितरि यजमानेऽप्यष्टधा शक्तिरेका ॥
वहति कुचभराभ्यां या विनम्रापि विश्वं ।
सकलजननि सा त्वं पाहि मामित्यवश्यम् ॥ ३८ ॥

इति श्रीपंचस्तव्यां सकलजननीस्तवः पंचमः ।

समाप्ता चेयं पञ्चस्तवी ।

ॐ संसारसागरमहं तरितुं सुनौकां राज्ञीं नमामि शिरसा शिवसुन्दरीं त्वाम् ॥ सर्वेश्वरीं सकललोकसुखप्रदात्रीं त्वामेव देवि सततं शरणं प्रपद्ये ॥ १ ॥ मातः पयोधरयुगं पिबतु त्वदीयं नागाननर्तुमुखवत्सलपुत्रयुग्मम् ॥ निर्झरजनाम्बु न इह स्पृहयाम्यहं तु त्वत्पादपद्मयुगलस्य भवाग्निशान्त्यै॥२॥ मातस्त्वदीयपरितोषविशेषलब्धे छत्रे प्रहृष्यतु सदा भगवान्सुरेन्द्रः ॥ पीयूषवर्षणकरात्तव देवि पादच्छत्राद्विना किमपि राज्ञि न नाम याचे ॥ ३ ॥ मोहाटवीविकटसंकटपीडितोऽहं राज्ञि प्रपन्नपरमार्तिहरा त्वमेका ॥ जाज्वल्यतेऽम्ब हृदयार्तिकरो ममान्तः पापाग्निरेशि शमयैनममास्वरूपे ॥ ४ ॥ आरारटीमि करुणं भवतापतप्तः प्रोल्लालपीमि पतितो भव-

दुःखसिन्धौ ॥ भीमोर्मि राज्ञि लुठितो भवसर्पदष्टस्त्वाम-
न्तरेण शरणं मम कः शरण्ये ॥ ५ ॥ राज्ञि प्रपन्नवरदे सुकृ-
तादपर्णां त्वामाश्रितोऽस्मि सुचिरात्तुमहद्धिचित्रम् ॥ किं
नास्मि भैरवि ऋणैस्त्रिविधैर्विमुक्तः पाशैरिवोत्कटविषाक्तभुज-
ङ्गमानाम् ॥ ६ ॥ राज्ञि प्रसीद नतसौख्यकरे मृडानि रुद्राणि
रोगहरणे चतुरे प्रसीद ॥ शर्वाणि सर्वजनपापहरे प्रसीद
गौरि प्रसीद गुणगौरि शिवे प्रसीद ॥ ७ ॥ कल्याणि राज्ञि
जगदीश्वरि विश्वमातस्त्वामन्तरेण नहि देवि सुखं जनस्य ॥
पुत्रस्य दुःखहरणे सततोद्यता द्राक् मातैव हि स्नुतकुचा नु
भवत्यवश्यम् ॥ ८ ॥ राज्ञ्यष्टकमिदं पुण्यं यः पठेद्धर्षपूरितः ॥
सोऽत्र द्राक् प्राप्नुयात्कामान्परलोके च स्वर्गतिम् ॥ ९ ॥

नाथ्यते यारमानाथोमानाथेन्द्रादिभिः सुरैः ॥ अनाथरक्षा
सिक्ता सा भूयात्सर्वैप्सितप्रदा ॥ १० ॥

इति श्रीराज्ञीस्तुतिः समाप्ताऽनाथक्षेमाय भवतु ॥

श्रीराज्ञीस्तोत्रम् ।

ॐ ॐकाररूपेऽखिलवेदसारे वेदान्तविज्ञानचणैः प्रगीते॥
मूर्ध्ना महाराज्ञि महार्हपीठे वन्दे त्वदीयं चरणारविन्दम्॥१॥
भूरादिलोके कृतलक्षणेऽजे राज्ञि प्रपन्नार्तिहरे नमस्ते॥ आक्र-
न्दमाकर्णय मे शरण्ये भक्तार्तिनाशे ह्यपरः प्रभुः कः ॥२॥
भुवोऽवकाशे रविचन्द्रदीप्तिर्देदीप्यते त्वामनु चित्प्रदीप्तिम्॥
तमःप्रपञ्चं प्रविलाप्य हार्दं पद्मं ममाबोधय राज्ञि मातः॥३॥

स्वःशाखिदर्पं हरतीष्टदानादाशाधिकाद्यत्स्मृतमात्रमेव ॥ मा-
तर्महाराज्ञि तदाननं ते वन्दे शरत्सुन्दरचन्द्ररम्यम् ॥ ४ ॥
तद्वाङ्मनोदूरमचिन्तनीयं रूपं स्वकीयं भवदुःखहारि ॥ पी-
यूषपीयूषमयूखतुल्यं राज्ञि प्रकाश्याम्ब कदा दयेथाः ॥ ५ ॥
सवितुः शक्तिभूता त्वं सूयसेऽदश्चराचरम् ॥ नमोऽस्तु ते
महाराज्ञि पाहि मां शरणागतम् ॥ ६ ॥ वरेण्यं त्वत्पदाभ्य-
र्चामृतचर्वणमस्तु मे ॥ नमो० ॥ ७ ॥ भर्गो भर्गोऽपि संसार-
भर्जको यस्तवैव सः ॥ नमो० ॥ ८ ॥ देवस्य त्रिपुरारातेराद्यो-
पुरुषिके शिवे ॥ नमो० ॥ ९ ॥ धीमहिम्नापि केनापि यां
स्तोतुं न प्रभूयते ॥ नमो० ॥ १० ॥ धियो मे घोरसंसारलं-
घने सन्तु सज्जिताः ॥ नमो० ॥ ११ ॥ योऽर्चति त्वां स

देवेशि मघवादिभिरच्चर्यते ॥ नमो० ॥ १२ ॥ नष्टितोष्ट्रव-
दम्बाहं कर्मपाशैः प्रपीडितः ॥ नमो० ॥ १३ ॥ प्रचोदयात्त-
वेच्छा मां तवैवाङ्घ्रिनिषेवणे ॥ नमो० ॥ १४ ॥ राज्ञीस्तोत्र-
मिदं पुण्यं यः पठेद्भक्तिसंयुतः ॥ तस्य सिध्यति सर्वेष्टम-
चिराद्देवदुर्लभम् ॥ १५ ॥

इति द्वितीयं श्रीराज्ञीस्तोत्रं समाप्तमनाथक्षेमाय भवतु ।

मातुः स्नेहः सर्वपुत्रेषु तुल्यः श्लाघ्याश्लाघ्येष्वम्ब चेत्सत्यमेतत् ॥ दुर्वृत्तस्याप्यात्मजस्यास्ति किं मे त्यागो युक्तस्तर्हि दोषौघहर्त्रि ॥

ॐ अष्टादशायुधवराढ्यभुजैर्युता या त्रातुं समस्तभुव-
नानि विपद्भयेभ्यः ॥ जागर्त्यशेषजनदुःखहरा परा सा श्रीशा-
रिका दिशतु मङ्गलसन्ततिं नः ॥ १ ॥ उद्यत्सहस्ररविभा-
स्वरदीप्तिदीप्तां सिंहासनां शशिकलाभरणां त्रिनेत्राम् ॥ यां
चिन्तयन्ति बहुभक्तिरसार्द्रचित्ताः श्रीशारिका० ॥ २ ॥ य-
त्पादयोः सकृदपीह कृतार्चनो ना भक्त्यान्वितो ह्यनुभव-
त्यमरप्रभुत्वम् ॥ श्रीराजराजसखिसौख्यनिवासभूमिः श्री-
शारिका० ॥ ३ ॥ सौदामनीप्रमदमत्तगजेन्द्रकर्णस्थित्या समापि
भजते स्थिरतां विभूतिः ॥ यत्पादपङ्कजयुगाश्रयणात्सदा
सा श्रीशारिका० ॥ ४ ॥ यत्कीर्तनश्रवणसंमननोत्थपुण्यं शक्नो-
ति नो गणयितुं बहुधाप्यनन्तः ॥ साऽशेषरोगदलनाय धृतौ-

षधीशा श्रीशारिका० ॥ ५ ॥ श्रीमातृकाभिरुपसेवितपादधू-ल्या प्रद्युम्नपीठसमवस्थितया ययेश्या ॥ काश्मीरदेशजनता परिपाल्यते सा श्रीशारिका० ॥ ६ ॥ यस्याः प्रदक्षिणपरिक्र-मणात्सुभक्त्या पापोऽप्यलंघ्यभवसागरपारमेति ॥ सा शोक-मोहपरितापविपत्तिहर्त्री श्रीशारिका० ॥ ७ ॥ मूलालवाल-मणिपूरकनाभिपद्महृत्कण्ठशिष्टिमतिवाह्य करन्ध्रमेत्य ॥ या मोदते सह शिवेन सहस्रपत्रे श्रीशारिका० ॥ ८ ॥ यस्या अनाहतनिनादसुधारसेन स्नातः परात्परसुखानुभवात्प्रहृष्टः॥ जीवंश्च मुक्त इव भाति नरोत्तमः सा श्रीशारिका० ॥ ६ ॥ यद्देहसंगतिरसेन सुधापरार्धधिक्कारकेण विषधारणशक्तियुक्तः॥ श्रीनीलकण्ठ इति कीर्तिमवाप शंभुः श्रीशारिका दिशतु मं-

गलसंततिं नः ॥ १० ॥ अमे सुरेशि योगीन्द्रामृतपायनत-
त्परे ॥ श्रीशारिके नमस्तेऽस्तु पाहि मां शरणागतम् ॥११॥
कामे कामितकामानां पूरणे पूर्णताप्रदे ॥ श्रीशारिके० ॥१२॥
चार्वङ्गि कोटिकन्दर्पलावण्ये विश्वमोहिनि ॥ श्रीशारिके०
॥ १३ ॥ टङ्कधारिणि शत्रूणां तिलशो देहखण्डिनि ॥ श्री-
शारिके० ॥ १४ ॥ तारे निसर्गगम्भीरभवसागरतारिणि ॥
श्रीशारिके० ॥ १५ ॥ पार्वति त्रिजगन्मातर्हिमवद्वंशपावने॥
श्रीशारिके० ॥ १६ ॥ यक्षिणीष्टाष्टसिद्धीनां दायिनि देवपू-
जिते ॥ श्रीशारिके० ॥ १७ ॥ सत्त्वादिशबलेऽनन्तब्रह्माण्ड-
जननीश्वरि ॥ श्रीशारिके० ॥ १८ ॥ कलानिधिकलाकान्त-
किरीटकुण्डलोज्ज्वले ॥ श्रीशारिके० ॥ १९ ॥

श्रीशारिका जगन्माताऽनाथनाथा सुरेश्वरी ॥ प्रीयतां पाद-योरेतत्स्तोत्रपुष्पसमर्पणात् ॥ २० ॥

इति श्रीशारिकास्तोत्रं समाप्तम् ।

—०:*:*:*:०—

श्रीज्वालामुखीस्तोत्रम् ।

ॐ जाज्वल्यमानवपुषा दशदिग्विभागान्सन्दीपयन्त्य-भयपद्मगदावराढ्या ॥ सिंहस्थिता शशिकलाभरणा त्रिनेत्रा ज्वालामुखी हरतु मोहतमः सदा नः ॥ १ ॥ आब्रह्मकीट-जननीं महिषीं शिवस्य मुग्धास्मितां प्रलयकोटिरविप्रकाशाम् ॥ ज्वालामुखीं कनककुण्डलशोभितांसां वन्दे पुनः पुनरपीह सहस्रकृत्वः ॥ २ ॥ देदीप्यमानमुकुटद्युतिभिश्च देवैर्दासैरिव

द्विगुणिताङ्घ्रिनखप्रदीप्तिम् ॥ ज्वालामुखीं सकलमङ्गलमङ्गलां
तामम्बां नतोऽस्म्यखिलदुःखविपत्तिदग्ध्रीम् ॥ ३ ॥ त्वित्य-
ञ्हुताशपवनाम्बरसूर्यचन्द्रयष्ट्राख्यमूर्तिममलानपि पावय-
न्तीम् ॥ ज्वालामुखीं प्रणतकल्पलतां शिवस्य साम्राज्यश-
क्तिमतुलां महतीं नमामि ॥ ४ ॥ नौमीश्वरीं त्रिजगतोऽभ-
यदानशौण्डां ज्वालामहार्यभवजालहरां नमामि ॥ मोहान्ध-
कारहरणे विमलेन्दुकान्तिं देवीं सदा भगवतीं मनसा स्म-
रामि ॥ ५ ॥ दुष्कर्मवायुभिरितस्तत एव दीप्तैः पापज्वल-
ज्ज्वलनजातशिखाकलापैः ॥ दग्धं च जीवयतु मां परितो
लुठन्तं देवी दयार्द्रहृदयामृतपूर्णदृष्ट्या ॥ ६ ॥ ज्वालामुखी
ज्वलदनल्पलयाग्निकोटिरोचिष्मती रविशशिप्रतिभानकर्त्री ॥

भक्तस्य भर्गवपुषा भवभर्जनाय भूयात्सदाभ्युदयदानवदा-
न्यमुख्या ॥ ७ ॥ त्वं चौषधीशमुकुटाऽहमसाध्यरोगस्त्वं चि-
त्प्रदीप्तिरहमत्र भवांध्यमग्नः ॥ त्वं चाम्ब ! कल्पतरुरेवमहं च
भिक्षुर्ज्वालामुखि प्रकुरु देवि यथोचितं मे ॥ ८ ॥ यद्‌ध्यान-
केसरिसमाक्रमणोत्थभीतेर्मर्मव्यथाजनकदुःखशतानि सद्यः ॥
गोमायवन्ति परितो भृशकान्दिशीकानस्मांश्च पालयतु सैव
भवाब्धिदुःखात् ॥ ९ ॥ ज्वालामुखि क्षणमपीह विलम्बमम्ब
नार्तो ह्यनर्थपतितः सहते विपन्नः ॥ हस्तस्थितामृतकमण्ड-
लुवारिणैव मां मूर्च्छितं झटिति जीवय तापतप्तम् ॥ १० ॥
बाह्यान्ध्यनाशनविधौ रविचन्द्रवह्निज्योतींषि देवि दययाऽज-
नयः पुरा त्वम् ॥ एतत्तु रूपमखिलान्तरमोहरात्रिध्वान्ता-

न्तकारि तव यत्स्फुरतादृतोऽन्तः ॥ ११ ॥ मन्ये त्रिधामन-
यने नयनत्रयं ते भक्तार्तिनाशननिमित्तविलोकनाय ॥ मातः
परं यदपि देवि तथाप्यऽधन्यस्त्वदृहृष्टिपातरहितोस्म्यहहा ह-
तोऽस्मि ॥ १२ ॥ सत्यं ब्रवीमि शृणु चित्त मदान्ध मूर्ख मा
गाः कदापि विषयान्विषमान्विषाक्तान् ॥ ईशीमपारकरुणां
भवभीतिभेत्रीमम्बां भजस्व सततं परसौख्यदात्रीम् ॥१३॥
त्वं मे महेशि जननी मरमार्तिहर्त्री त्वं मे पिता हिततमस्त्व-
महेतुबंधुः ॥ त्वं मे भवाब्धितरणे दृढनौस्त्वमेव दुःखामया-
धिहरणे चतुरश्च वैद्यः ॥ १४ ॥ ज्वालां जगज्जननसंहरण-
स्थितीनां हेतुं गतिं मुषितलज्जितदुःखितानाम् ॥ उन्मोचनां
च भवबंधनदुर्गतीनां त्वां नौमि नौमि शरणं शरणागता-

नाम् ॥ १५ ॥ ज्वलामुखीस्तवमिमं शृणुयात्पठेद्वा यः श्रद्ध-
या परमया बहुभक्तियुक्तः ॥ भूयात्स दग्धबहुजन्मशता-
र्जिताऽघोऽनाथोप्यनेकजननाथितराज्यसंपत् ॥ १६ ॥

इति श्रीज्वालामुखीस्तोत्रं समाप्तम् ।

—०:*:*:*:०—